

# षष्ठः पाठः । वीरवनिता विश्पला।

ऋग्वेदात् उद्धृता अतीव अद्भुता रोमाञ्चकारिणी च एषा कथा स्त्रीणां सामर्थ्यं दर्शयति (ऋ.१.११६.१५)। शस्त्रक्रियाविशारदौ अश्विनीकुमारौ प्रगतवैद्यकतन्त्रज्ञानस्य मूलाधारौ स्तः। विश्पलायाः चरित्रं प्रेरणादायकं खलु सर्वेषां कृते। – **सम्भाषणसन्देश–मासिकात्**।



खेलराजः नाम कश्चित् नृपः। विश्पला तस्य पत्नी। सा यथा महाविदुषी आसीत्, तथैव रणकुशला अपि आसीत्। खेलराजः अपि शूरः पराक्रमी च आसीत्। सः विश्पलया सह सुखेन जीवति स्म।

अथ कदाचित् शत्रवः खेलराजस्य राज्ये आक्रमणं **कृतवन्तः**। महत् युद्धम् आरब्धम्। सेनायाः नायकः खेलराजः रणरङ्गं **प्रविष्टवान्**। विश्पला अपि रणरङ्गं **प्रविष्टवती**। भुवम् अवतीर्णा चामुण्डेश्वरी इव सा शत्रूणां संहारं **कृतवती**। तस्याः शौर्यं पराक्रमं च दृष्ट्वा शत्रवः अपि चकिताः अभवन्।

'एषा रणरङ्गात् यावत् न निवार्यते तावत् जयः सर्वथा न प्राप्यते' इति चिन्तयित्वा शत्रुसैनिकाः युगपत् आक्रम्य ताम् **अवरुद्धवन्तः**। शत्रुसैनिकाः ते असङ्ख्याः आसन्, विश्पला तु एकाकिनी ! तथापि तस्याः मनसि न भीतिलेशः अपि आसीत्। प्रत्युत द्विगुणितेन उत्साहेन युद्धं **कृतवती**। युद्धसमये शत्रुसैनिकाः तस्याः एकं पादं **कर्तितवन्तः**। अनन्तरम् 'इतः परम् एतस्याः कारणात् पीडा न भविष्यति' इति निर्णयं कृत्वा ते शिबिरं **प्रतिगतवन्तः**।



यद्यपि विश्पलायाः पादः भग्नः तथापि सा हतोत्साहा न जाता। चैतन्यमूर्तिः सा वीराङ्गना एव आसीत्। 'श्वः मया युद्धं करणीयम् एव' इति निश्चित्य सा पादं पुनः प्राप्तुम् ऐच्छत्। अतः सा निश्चलतया उपविश्य अश्विनीकुमारयोः ध्यानं **कृतवती**। तस्याः



भक्ते : कारणात् अश्विनीकुमारौ लोहयुक्तं पादं योजयित्वा तां यथापूर्वं **कृतवन्तौ**। एतस्मात् विश्पला यथापूर्वं चलितुं युद्धं कर्तुं च समर्था जाता।

अनन्तरदिने प्रात: सा महता उत्साहेन रणरङ्गम् **आगतवती**। रणरङ्गे तां दृष्ट्वा एव शत्रुसैनिका: चकिता: भीता: च। तस्या: दर्शनमात्रेण एव तेषां धैर्यं नष्टं जातम्। सा यदा आयुधप्रहारम् **आरब्धवती** तदा ते सर्वथा हतोत्साहा: जाता:। विश्पला शत्रून् कदलीवृक्षान् इव लीलया **कर्तितवती**। सहस्राधिका: सैनिका: तया संहता:।

एवं विश्पलाया: शौर्यस्य कारणत: तस्मिन् युद्धे खेलराजस्य एव जय: अभवत्।

वीरवनिता विश्पला भर्त्रा सह रणरङ्गं प्रविश्य शौर्येण युद्धं **कृतवती**। पादकर्तनानन्तरमपि अश्विनीकुमारयो: अनुग्रहेण पादं पुन: **प्राप्तवती** शत्रून् **संहतवती** च। एतेन साहसेन सा वेदवाङ्मये बहुधा प्रशंसिता।

विश्पलाया: शौर्यं तथा च अश्विनीकुमारयो: शल्यक्रियाकौशलं स्मरन्तु इति अस्मान् उपदिशति इतिहास:।

## भाषाभ्यास:



### १. उचितं पर्यायं चित्वा रिक्तस्थानानि पूरयत।

अ) शत्रव: ____। (कृतवान्/कृतवन्त:)
आ) खेलराज: ____। (प्रविष्टवन्त:/प्रविष्टवान्)
इ) विश्पला ____। (प्रविष्टवान्/प्रविष्टवती)
ई) सा युद्धं ____। (कृतवान्/कृतवती)
उ) शत्रुसैनिका: ____। (अवरुद्धवन्तौ/अवरुद्धवन्त:)
ऊ) सैनिका: शिबिरं ____। (गतवन्त:/गतवन्तौ)
ए) शत्रुसैनिका: पादं ____। (कर्तितवन्त:/कर्तितवन्तौ)
ऐ) सा रणाङ्गणम् ____। (आगतवत्यौ/आगतवती)
ओ) विश्पला ध्यानम् ____। (आरब्धवान्/आरब्धवती)
औ) अश्विनीकुमारौ तां यथापूर्वं ____। (कृतवन्तौ/कृतवत्यौ)

### २. स्तम्भमेलनं कुरुत।

| | | | | | |
|---|---|---|---|---|---|
| अ | १. लोहयुक्तम् | २. वीराङ्गना | ३. भीता: | ४. महत् | ५. शूर: |
| आ | १. युद्धम् | २. शत्रुसैनिका: | ३. खेलराज: | ४. पादम् | ५. विश्पला |

### ३. अधोदत्तेषु विशेषणेषु यानि विशेषणानि विश्पलां न वर्णयन्ति तानि पृथुक् कुरुत।

चकिता:, प्रशंसिता, भीता, समर्था, निश्चला, एकाकिनी, चैतन्यमूर्ति:, अवरुद्धा, चामुण्डेश्वरी, महाविदुषी, रणकुशला, शूर:, नायिका, दु:खिता।

### ४. माध्यमभाषया उत्तरं लिखत। 
१. विश्पलाया: शौर्यस्य वर्णनं कुरुत ।
२. विश्पला अश्विनीकुमारयो: ध्यानं किमर्थं कृतवती ?

५. पाठात् धातुसाधित-अव्ययानि चिनुत पृथक्कुरुत च।

६. समानार्थकशब्दं पाठात् लिखत। अरिः, चरणः, वीर्यम्, सङ्गरः, रणाङ्गणम्, रक्षकाः, पण्डिता, वीक्ष्य, वेदना, अगणिताः।

७. विरुद्धार्थकशब्दं पाठात् लिखत। मित्रम्, कातरता, असमर्था, कातरः, पराजयः।

८. रिक्तस्थानं पूरयत।

| पुंलिङ्गम् | स्त्रीलिङ्गम् | पुंलिङ्गम् | स्त्रीलिङ्गम् | पुंलिङ्गम् | स्त्रीलिङ्गम् |
|---|---|---|---|---|---|
| पतिः | ____ | भीतः | ____ | ____ | नायिका |
| रणकुशलः | ____ | एकाकी | ____ | ____ | समर्था |
| ____ | शूरा | ____ | हतोत्साहा | राजा | ____ |

**मौखिककार्यम्-अधोदत्तं कार्यं केन कृतम् इति लिखत।**

(अ) सेनायाः नायकत्वस्य स्वीकरणम्। (आ) राज्ये आक्रमणम्।
(इ) खेलराजस्य पश्चात् रणरङ्गं प्रवेशः। (ई) जयं प्राप्तुं युगपत् आक्रमणम्।
(उ) द्विगुणित-उत्साहेन युद्धम्। (ऊ) एकपादकर्तनम्।
(ए) शिबिरं प्रत्यागमनम्। (ऐ) विश्पलायाः दर्शनमात्रेण धैर्यनाशनम्।
(ओ) सहस्राधिकसैनिकानाम् संहरणम्। (औ) आयुधप्रहारेण उत्साहनाशनम्।

**गायत नन्दत !**

**धीवरगानम्**

नायकः - आयाहि रेऽऽ ! आयाहि रेऽऽ ! आयाहि रेऽऽ !
विहायसि सराग-रश्मि-चन्द्रमाः
तनोति सान्द्र-रोचि-मञ्जु-चन्द्रिकाः
सिन्धुरावघोषिताः रोदसीकन्दराः
यान्तु यानपात्रचालकाः सधीवराः ।।आयाहि।।
अनुयायिनः - याहि रे ! याहि रे ! याहि रे ! याहि रे ! याऽऽहि।।
नायकः - चन्द्रहासमज्जिता तामसी प्रिया
सर्व-देह-कान्ति-पुञ्ज-मञ्जु-वल्गना
निश्चला विभासते तारलोचना
यान्तु यानपात्रचालकाः सधीवराः ।।आयाहि।।
अनुयायिनः - याहि रे ! याहि रे ! याहि रे ! याहि रे ! याऽऽहि।।
नायकः - सागरेण चुम्बिता चन्द्रिका मुदा
राजते विलास-हास-लास्य-चित्रिता
रागिणीव भासते रागरञ्जिता
यान्तु यानपात्रचालकाः सधीवराः ।।आयाहि।।
अनुयायिनः - याहि रे ! याहि रे ! याहि रे ! याहि रे ! याऽऽहि।।

**-श्री. परिक्षित् शर्मा**

**खेलत नन्दत !** **स्वराणां सृष्टिः।**

**बुद्धिजालं पूरयत।**

१. अ + इ =
२. आ + अ =
३. अ + ई =
४. इ + अ =
५. ई + अ =
६. अ + ऊ =
७. अ + अ =
८. ऊ + अ =
९. अ + ऐ =
१०. अ + उ =
११. अ + ऋ =
१२. अ + औ =
१३. उ + अ =
१४. अ + ओ =
१५. ऋ + अ =
१६. अ + ए =

# रम्यसंस्कृतम्। उपपदविभक्तय: (धातव:)।

१. गम् = (**द्वितीया**) पाण्डवा: **हस्तिनापुरम्** अगच्छन्।
२. कुप् = (**चतुर्थी**) माता **शिशवे** कदापि न कुप्येत्।
३. क्रुध् = (**चतुर्थी**) स्वामिनी **भृत्याय** क्रुध्यति।
४. दा-यच्छ् = (**चतुर्थी**) शिष्या: **गुरवे** दक्षिणां यच्छन्तु।
५. कथ् = (**चतुर्थी**) अप्सरसौ **देवेन्द्राय** वृत्तान्तम् अकथयताम्।
६. रक्ष् = (**पञ्चमी**) कृष्ण: **सङ्कटात्/आपद:** गोपालान् रक्षति।
७. वि + रम् = (**पञ्चमी**) त्वं **वृथाकलहात्** विरम।
८. स्निह् = (**सप्तमी**) वयं **भ्रातृषु** स्निह्येम।
९. रुच् = (**चतुर्थी**) **नरेन्द्राय** व्यायाम: रोचते।
१०. स्पृह् = (**चतुर्थी**) गौरी **कुण्डलाय** स्पृहयति।



**गणेशाय** मोदका: रोचन्ते।
गणेश: **मोदकेभ्य:** स्पृहयति।



**शिवाय** बिल्वपत्राणि रोचन्ते।
शिव: **बिल्वपत्रेभ्य:** स्पृहयति।



**महालक्ष्म्यै** कमलं रोचते।
महालक्ष्मी: **कमलाय** स्पृहयति।

एष: निखिल:। **निखिलाय** किं किं रोचते?



**निखिलाय**



लड्डुका: रोचन्ते।




शाला रोचते।



पुस्तकानि रोचन्ते।



गणितसंस्कृते रोचेते।

एषा काश्मीरा। काश्मीरा **कस्मै/कस्यै** स्पृहयति ?



काश्मीरा



**कण्ठहाराय** स्पृहयति।



**शशकाभ्यां** स्पृहयति।



**जलक्रीडायै** स्पृहयति।



**वेणवे** स्पृहयति।